सप्तमः पाठः
७

# धन्योऽयं दानवीरः

( २१-५० संख्या , लृट्लकारः )



को न जानाति प्रातः स्मरणीयस्य मेदपाटवीरस्य महाराणाप्रतापस्य नाम। अस्य महावीरस्य जीवनलक्ष्यं मातृभूम्याः मेदपाटधरायाः स्वतन्त्रता आसीत्। स्वातन्त्र्यप्राप्त्यर्थं महाराणाप्रतापः तस्य परिवारजनाश्च वने अनेकानि कष्टानि असहन्त। वनप्रान्ते भ्रमन् सः अनेकवारं आहाररहितं जीवनमपि यापितवान् अन्नाभावे सः घासरोटिकामपि खादितवान् । परं मेदपाटवीरः कदापि स्वलक्ष्यात् विचलितः नाभवत्।

धनाभावे सेनासङ्घटनमपि दुष्करम् अभवत्। तदा भामाशाहः राणाप्रतापस्य समक्षमागतः। भामाशाहः स्वस्य सम्पूर्णजीवनस्य परिश्रमेणार्जितं सञ्चितं च धनं प्रताप-पादयोः समर्पितवान्। प्रतापः विस्मितोऽभवत्। भामाशाहः अवदत् - ''महाराज! द्रव्यमिदं तु तुभ्यम् अस्माकं समाजाय, अस्माकं देशाय एव यच्छामि। भवान् एतं धनराशिं स्वीकृत्य देशोद्धारं करोतु।''

प्रतापः जानाति स्म यत् भामाशाहः पूर्वमेव अर्बुदपर्वते जैनमन्दिरं निर्मातुं सङ्कल्पितवान् धनमिदं तदर्थमेव एव सुरक्षितं स्थापितम्। अत एव प्रतापः अवदत् ''देशभक्तभामाशाह! तव मन्दिरनिर्माणस्य किं भविष्यति?'' भामाशाहस्य गर्वपूर्णम् उत्तरम् आसीत् ''महाराज! राष्ट्रमेव न रक्षितं तदा किं तस्य

मन्दिरस्य निर्माणेन ? अस्तु, भवान् स्वदेशरक्षायै स्वीकरोतु इदं द्रव्यम्।''

स्वदेशरक्षार्थं दत्तोऽयं धनराशिः पञ्चाशते सहस्राय सैनिकेभ्यः विंशतिं वर्षाणि यावत् वेतनवस्त्रशस्त्रेभ्यः च पर्याप्तः आसीत्। वीरवरेण प्रतापेन प्रचुरेण तेन धनेन शस्त्राणि सङ्गृह्य स्वजन्मभूमिः मेदपाटधरा शत्रुभ्यः विमुक्ता। एतस्याः घटनायाः कालाद् एव भामाशाहः दानदातॄणां दानमूर्तेः पर्यायरूपेण प्रसिद्धः अभवत्। भामाशाहेन एतस्मै पुनीतकार्याय धनराशिं दत्त्वा स्वदेशस्य स्वस्य च यशः सर्वकालाय एव अक्षुण्णं कृतम्।

धन्योऽयं देशभक्तः, दानवीरः भामाशाहः।

## शब्दार्थः

| शब्दः | सरलार्थः | हिन्दी अर्थ |
|---|---|---|
| सङ्कल्पितवान् | निश्चितवान् | निश्चय किया |
| दुष्करम् | कठिनम् | कठिन |
| देशोद्धारम् | देशस्य उद्धारम् | देश का उद्धार |
| सङ्गृह्यम् | एकत्रितम् | इकट्ठा |
| अक्षुण्णम् | स्थायि | अमर |

## अभ्यासः

१. **निम्नपदानाम् उच्चारणं कुरुत -**

इतस्ततः, परिश्रमेणार्जितम्, देशोद्धारम्, गर्वपूर्णमुत्तरम्, सङ्गृह्य

२. **एकवाक्येन उत्तरत -**

(क) महाराणा प्रतापस्य जीवनस्य लक्ष्यं किम् आसीत्?

(ख) महाराणाप्रतापः भामाशाहस्य केन कार्येण विस्मितः अभवत्?

(ग) स्वलक्ष्यात् कः विचलितः न अभवत्?

(घ) भामाशाहेन स्वसम्पत्तिः किमर्थं दत्ता?

(ङ) दानमूर्तेः पर्यायरूपेण कः प्रसिद्धोऽभवत्?

**३. रेखाङ्कितपदानि आधारीकृत्य प्रश्ननिर्माणं कुरुत -**

(क) स्वतन्त्रताप्राप्त्यर्थं <u>महाराणाप्रतापः</u> अनेकानि कष्टानि असहत्।

(ख) भामाशाहः <u>राणाप्रतापस्य</u> समक्षम् आगतः ।

(ग) <u>प्रतापः</u> विस्मितोऽभवत्।

(घ) <u>धनमिदं</u> तदर्थम् एव सुरक्षितं स्थापितम्।

(ङ) भामाशाहस्य <u>गर्वपूर्णम्</u> उत्तरम् आसीत्।

(च) <u>प्रतापेन</u> स्वजन्मभूमिः मेदपाटधरा शत्रुभ्यः विमुक्ता।

**४. समानार्थकानि पदानि मेलयत -**

| | |
|---|---|
| (क) वनम् | रिपुः |
| (ख) धनम् | काननम् |
| (ग) दुष्करम् | द्रव्यम् |
| (घ) पादयोः | पृथिवी |
| (ङ) धरा | चरणयोः |
| (च) शत्रुः | कठिनम् |

**५. उपयुक्तकथनानां समक्षम् 'आम्' अनुपयुक्तकथनानां समक्षं 'न' इति लिखत -**

(क) वनप्रान्ते भ्रमन् सः अनेकवारम् आहाररहितं जीवनमपि यापितवान्। [ ]

(ख) महाराणाप्रतापः घासरोटिकाम् अपि खादितवान् । [ ]

(ग) प्रतापः न जानाति स्म यत् भामाशाहः पूर्वमेव अर्बुदपर्वते जैनमन्दिरं निर्मातुं सङ्कल्पितवान्। [ ]

(घ) भामाशाहस्य नाम दानदातॄणां मध्ये प्रसिद्धम् अस्ति। [ ]

(ङ) भामाशाहेन राष्ट्ररक्षायै स्वसम्पत्तिः न समर्पिता। [ ]

**६. भिन्नप्रकृतिकं पदं चित्वा लिखत -**

(क) गच्छति, पठति, धावति, अहसत्, क्रीडति ..............................

(ख) चटकः, सेवकः, शिक्षकः, लेखिका, क्रीडकः ..............................

(ग) व्याघ्रः, भल्लूकः, गजः, कपोतः, वृषभः ..............................

(घ) पृथिवी, वसुन्धरा, धरित्री, यानम्, वसुधा ..............................

(ङ) आम्रः, दाडिमः, कदली, निम्बः, मल्लिका ..............................

७. **निम्नलिखितवाक्यानि भविष्यत्काले परिवर्त्य लिखत -**

| | | |
|---|---|---|
| **यथा -** | रोहितः पाठं पठति | रोहितः पाठं पठिष्यति |
| (क) | वानरः फलं खादति | ............................... |
| (ख) | बालकः क्रीडति | ............................... |
| (ग) | मित्रं पत्रं लिखति | ............................... |
| (घ) | आकाशात् जलं पतति | ............................... |
| (ङ) | अश्वः मार्गे धावति | ............................... |

## योग्यता-विस्तारः

१. मारवाडस्य रावः चन्द्रसेनः मारवाडस्य प्रतापः इति नाम्ना ज्ञायते। एषोऽपि महाराणाप्रताप इव यवनानाम् दासतां न अङ्गीकृतवान्। अस्य जन्म जोधपुरस्य राजधान्यां मण्डोरे अभवत्। प्रतापस्य अग्रगामी, विस्मृतः राजा इति नामद्वयेन एषः ज्ञायते। अकबरः रावचन्द्रसेनं मारवाडात् नागौरराज-सभायाम् आहूतवान्। परं तत्र एषः महान् आत्मा अकबरस्य अधीनतां तिरस्कृत्य स्वराज्यं मारवाडम् आगच्छत्। अकबरः हुसैनकुलीखानस्य नेतृत्वे रावचन्द्रसेनम् अनुसरतः सैनिकान् प्रेषितवान् रावचन्द्रसेनः अनुगच्छन्तीं सेनां अभिज्ञाय मारवाडात् दूरं भाद्राजूणस्य पर्वतमार्गेण जालौरं प्राप्य सिवाणदुर्गे शरणं प्राप्तवान्। अस्य मृत्युः सहारणपर्वतशृङ्खलासु जाता। एषः बहुषु महत्त्वपूर्णेषु युद्धेषु अयुध्यत्।



## २. संस्कृतेसंख्या लेखनक्रीडाभ्यासं कुरुत -

। शिक्षकः कक्षां गणद्वये विभक्तं कुर्यात्। ततः परं द्वाभ्यां गणाभ्याम् एकैकं छात्रम् आहूय स्वयं द्वारा शब्देन उक्तसंख्या श्यामपटे अङ्केन लेखितुं वदेत्। यः छात्रः पूर्वं लिखेत् तस्मै वर्धापनं प्रदाय तस्य उत्साहवर्धनं कुर्यात् एव प्रतिस्पर्धारूपेण क्रीडा कारणीया।




## ३. संस्कृतेसंख्यानाम् उच्चारणं कृत्वा संख्यान्वेषणक्रीडा क्रीडामः -

| | | | | | |
|---|---|---|---|---|---|
| २१ | एकविंशतिः | ३१ | एकत्रिंशत् | ४१ | एकचत्वारिंशत् |
| २२ | द्वाविंशतिः | ३२ | द्वात्रिंशत् | ४२ | द्विचत्वारिंशत् |
| २३ | त्रयोविंशतिः | ३३ | त्रयस्त्रिंशत् | ४३ | त्रिचत्वारिंशत् |
| २४ | चतुर्विंशतिः | ३४ | चतुस्त्रिंशत् | ४४ | चतुश्चत्वारिंशत् |
| २५ | पञ्चविंशतिः | ३५ | पञ्चत्रिंशत् | ४५ | पञ्चचत्वारिंशत् |
| २६ | षड्विंशतिः | ३६ | षट्त्रिंशत् | ४६ | षट्चत्वारिंशत् |
| २७ | सप्तविंशतिः | ३७ | सप्तत्रिंशत् | ४७ | सप्तचत्वारिंशत् |
| २८ | अष्टाविंशतिः | ३८ | अष्टात्रिंशत् | ४८ | अष्टचत्वारिंशत् |
| २९ | नवविंशतिः | ३९ | नवत्रिंशत् | ४९ | नवचत्वारिंशत् |
| ३० | त्रिंशत् | ४० | चत्वारिंशत् | ५० | पञ्चाशत् |

। शिक्षकः छात्रम् आहूय शिक्षकद्वारा उक्तसंख्यां श्यामपट्टे अन्वेषणाय वदेत्। छात्रः अन्विष्य प्रदर्शयेत्।एतां क्रीडां स्पर्धारूपेण कारयेत्।



४. **लृट्लकारस्य सामान्यक्रियापदानां पूर्वम् अभ्यासः कृतः। विशिष्टानां क्रियापदानां इदानीम् अभ्यासं कुर्मः-**

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | भविष्यति | भविष्यतः | भविष्यन्ति |
| मध्यमपुरुषः | भविष्यसि | भविष्यथः | भविष्यथ |
| उत्तमपुरुषः | भविष्यामि | भविष्यावः | भविष्यामः |

(अस्य अभ्यासस्य द्वारा वयम् अन्यानि अपि क्रियारूपाणि ज्ञास्यामः।)

| लट्लकारः | लृट्लकारः | लट्लकारः | लृट्लकारः |
|---|---|---|---|
| पठति | पठिष्यति | करोति | करिष्यति |
| खादति | खादिष्यति | पश्यति | द्रक्ष्यति |
| विकसति | विकसिष्यति | इच्छति | एषिष्यति |
| स्मरति | स्मरिष्यति | गायति | गास्यति |
| नृत्यति | नर्तिष्यति | जयति | जेष्यति |
| आकर्णयति | आकर्णयिष्यति | उपदिशति | उपदेक्ष्यति |
| चिन्तयति | चिन्तयिष्यति | प्रविशति | प्रवेक्ष्यति |
| तोलयति | तोलयिष्यति | पालयति | पालयिष्यति |